३

कविपरिचयः-३

प्रस्तावना

संस्कृतसाहित्ये नैके कवयः तेषां कृतयश्च विराजन्ते। तेषां याः कृतयः ताः पुस्तकरूपेण अस्माकं पुरत आयान्ति। किन्तु तत्तत्कवीनां विषये अस्माकं ज्ञानस्य अवकाशः न भवति। अतः तेषां कवीनां देशस्य कालस्य च ज्ञानमनिवार्यं यतः कवीनां काव्यानि प्रायेण देशेन कालेन च प्रभावितानि भवन्ति। अत्र प्रकरणे माघस्य श्रीहर्षस्य क्षेमेन्द्रस्य कल्हणस्य तथा च भट्टिस्वामिनः विषये आलोचनं विहितम् वर्तते। तेषां चरितम् काव्यस्य विशिष्टगुणाः रीतिः इत्यादयः विषयाः अत्र सम्यक् संगृहीताः। तान् वयं ध्यानेन परिच्छेदेऽस्मिन् पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- माघः श्रीहर्षः क्षेमेन्द्रः कल्हणः भट्टस्वामी इति एतेषां कवीनां देशकालकृतीः जानीयात्।
- तेषां काव्यरचनाशैलीं ज्ञास्यति।
- तेषां काव्यानां वैशिष्ट्यानि ज्ञास्यन्ति।
- शिशुपालवधकाव्यविषये ज्ञास्यति।
- माघे सन्ति त्रयो गुणा इति भणित्याः तात्पर्यम् अवगमिष्यसि।

३.१) माघः

३.१.१) सामान्यपरिचयः

माघस्य कृतौ शिशुपालवधमहाकाव्ये अन्तिमे कविः स्वयमेव स्वस्य परिचयं प्रादात्। तत एव ज्ञायते यत् दत्तक इति कश्चन माघस्य पितृदेव आसीत्। तस्य पितामहः सुप्रभदेवः वर्मलाताख्यस्य राज्ञः अमात्यपदम् अलङ्कृतवान्।

३.१.२) माघस्य देशः

पुरा मीनमल्लाख्यम् एकं नगरम् अवर्तत। तद् विद्यायाः पीठम् इति प्रथितम् आसीत्। एवञ्च अतः

एव राजधानी अपि आसीत्। माघस्य जन्म प्रथिते मीनमल्लाख्यनगरे अभवत्। मेरुतुङ्गाचार्यस्य मतेन श्रीमालनगर आसीत् माघस्य निवासस्थलम्। इदानीन्तने काले गुर्जरप्रदेशे भिन्माल इति ग्राम एव कवेः स्थलमिति अनेके मन्यन्ते। भोजप्रबन्धे गुर्जरनिवासी अयं कविः इति वर्णितं दृश्यते।

३.१.३) माघस्य कालः

वामनकृते काव्यालंकारे आनन्दवर्धनकृते ध्वन्यालोके तथा मुकुलभट्टकृते अभिधावृत्तिमातृका इत्यादिषु ग्रन्थेषु माघस्य पद्यानाम् उद्धृतानि दृश्यन्ते। अतः तेभ्यः कविभ्यः पूर्वकालिकोऽयं कविः इति अनुमीयते। महामतीनां महतः अनुशीलनात् ज्ञातं यत् सप्तशतकस्य अन्तिमात् अष्टमशतकपर्यन्तम् माघस्य काल इति।

३.१.४) माघस्य कृतयः

शिशुपालवधकाव्यं माघस्य एका एव कृतिः प्राप्यते। तत्र काव्ये द्वाविंशतिः सर्गाः सन्ति। तत्र १६२५ श्लोकाः सन्ति। अत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः मुख्यतया वर्णितः। महाभारतोक्तां कथां माघो वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्। अत्र काव्ये नायकः भगवान् श्रीकृष्णः प्रतिनायकश्च शिशुपालः।

पाठगतप्रश्नाः-१

१. माघस्य पिता कः आसीत्।

२. माघस्य पितामहः कः आसीत्।

३. माघस्य पितामहः कस्य राज्ञः सभायाम् आसीत्।

४. माघस्य जन्म कस्मिन् नगरे बभूव।

५. माघः निवासस्थलं किं नगरमासीत्।

६. आनन्दवर्धनकृतस्य ग्रन्थस्य नाम किम्।

७. वामनकृतस्य ग्रन्थस्य नाम किम्।

८. माघः आनन्दवर्धनस्य पूर्वकालिक इति कथं ज्ञायते।

९. माघस्य कालः कः।

१०. माघस्य कति कृतयः, काः च ताः।

११. शिशुपालवधस्य मुख्यः विषयः कः।

१२. शिशुपालवधकाव्यस्य उपजीव्यः ग्रन्थः कः।

१३. शिशुपालवधस्य नायकः कः।

१४. शिशुपालवधस्य प्रतिनायकः कः।

३.२) शिशुपालवधकाव्यम्

अत्र महाभारतापेक्षया महाकाव्योपयोगिनः अनेके विषयाः वर्णिताः। तृतीयसर्गात् त्रयोदशसर्गं यावत् भगवतः श्रीकृष्णस्य ऐश्वर्य-प्रस्थ-वनविह-जलक्रीडा-रैवतकपर्वत-सन्ध्या-प्रातः-प्रकृत्यादिविषयाणां वर्णनानन्तरं महाराजस्य युधिष्ठिरस्य राजसूययज्ञे श्रीकृष्णस्य आगमनं वर्णितम्।

महाकविमाघेन प्रणीतं शिशुपालवधमहाकाव्यं विंशतिसर्गेषु पूर्णं जातम्। तस्य ऐतिहासिकं वृत्तमधोलिखितमस्ति-

पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य इन्द्रप्रस्थनगरीं समधिकृतवन्त आसन्। भगवतः श्रीकृष्णस्य कृपया अर्जुन-भीम- नकुल-सहदेवानाम्पराक्रमेण च धर्मराजेन युधिष्ठिरेण समग्रमपि जम्बूद्वीपं विजित्य विपुलं धनम् एकस्थीकृतम्। एवमतुलसाम्राज्यं विपुलं वैभवञ्च अवाप्य युधिष्ठिरो राजसूययज्ञं कर्तुम् ऐच्छत्। प्रायः समग्रस्य जम्बूद्वीपस्य (एशियायाः) भगवतः श्रीकृष्णस्य अनुयायिनो विरोधिनश्च राजानो यज्ञेऽस्मिन् आमन्त्रिता आसन्। यज्ञेऽस्मिन् भगवान् श्रीकृष्णः सर्वकर्मद्रष्टा आसीत्। सर्वेऽपि राजानो यज्ञकार्येषु योग्यतानुसारं भागं गृह्णन्ति स्म। अयं यज्ञ आसीत् ऐतिहासिकः। अतीवमहत्सज्जया यज्ञः सुसम्पन्नः। याज्ञिकाः ब्राह्मणाः दक्षिणादिना सत्कृताः।

ततः सदस्यपूजाया अवसरः समुपस्थितः। शास्त्रानुसारेण यज्ञसमाप्तौ गुणवतेऽर्घ्यप्रदानस्य नियमोऽस्ति। प्रतिष्ठेयं कस्मै प्रदेया इत्यस्मिन् विषये युधिष्ठिरो भीष्मम् पप्रच्छ। शास्त्रानुसारं षडङ्गवेदाध्ययनाध्यापनरतो ब्राह्मणस्नातकः, गुरुः बन्धुः, जामाता, राजा, ऋत्विग्, याज्ञिकश्चैते षट् सदस्याः पूजनार्हाः भवन्ति। यदि कश्चन सर्वगुणसम्पन्नः स्यात्तर्हि सोऽपि पूजनार्हो भवति। भीष्मोऽस्यै प्रतिष्ठायै भगवान् श्रीकृष्ण एव महत्तम इति उद्घोषितवान्। युधिष्ठिरश्च भगवन्तं श्रीकृष्णमेव पूजयामास।

शिशुपालो भगवतः श्रीकृष्णस्येदं सम्मानं द्रष्टुं नाशकत। स क्रोधाविष्टः रक्तीकृतनेत्रश्च सन् उच्चमुष्णञ्च श्वसितुमारेभे। धर्मराजं युधिष्ठिरं च निन्दित्वा भगवतः श्रीकृष्णस्योपरि नानाविधान् आक्षेपान् कर्तुं प्रवृत्तः। भगवान् श्रीकृष्णः मौनावलम्बितः सन् मनसैव शिशुपालस्य अपराधान् गणयति स्म। भीष्मः शिशुपालस्येदं धाष्टर्यं सोढुं नाशकत् तन्मुखाच्च भगवतः श्रीकृष्णस्य निन्दां श्रुत्वा सः क्षुब्धः सञ्जातः। तेनोक्तम् – "अद्य मया विहिता भगवतः श्रीकृष्णस्य पूजा न यस्मै रोचते सः धनुर्धारयेत्"। इत्युक्ते भीष्मे शिशुपालसमर्थकाः राजानो यज्ञमण्डपाद् बहिर्गन्तुमुद्यता बभूवुः। शिशुपालः पुनः कठोराणि वचांसि उवाच, तत्स्थानाच्च निःसृत्य भगवन्तं श्रीकृष्णं युद्धार्थम् आहूय चमूसज्जां कर्तुमारेभे। पाण्डवाः तत्पक्षिणश्च राजानः शान्ता आसन्। चमूसज्जां विधाय शिशुपालेन राजसभायां स्वकीयो दूतः प्रेषितः। स दूतः श्लिष्टशब्दैर्भगवन्तं श्रीकृष्णं निन्दयामास। भगवतः श्रीकृष्णस्य प्रेरणया सात्यकिः तस्य आक्षेपाणाम् उचितमुत्तरं प्रादात्, तथापि सोऽनेकानि निन्द्यानि वचांसि अकथयत्। अनेन भगवान् श्रीकृष्णः तत्समर्थकाः राजानश्च अत्यन्तं क्रुद्धाः सञ्जाताः। अन्ते च युद्धम् प्रारब्धम् एव। शिशुपालस्य सम्पूर्णाऽपि चमूः नष्टा। चम्वां विनष्टायां सः स्वयं श्रीकृष्णेन साकं योद्धुम् आरेभे। युद्ध्यमानः स श्रान्तो

भूत्वा कठोराणि वचांसि अवदत्। ततः शतसंख्याकेषु अपराधेषु पूर्णेषु, तद्वधेऽधिकं विलम्बम् अनुचितम् मत्वा भगवान् श्रीकृष्णः सुदर्शनचक्रेण शिशुपालस्य शिरः चिच्छेद। अस्मिन्नेव समये तस्य शरीराद् एकः तेजःसमूहो निःसृत्य भगवतः श्रीकृष्णस्य शरीरेऽन्तर्हितः। सर्वे चानया घटनया विस्मिताः बभूवुः।

पाठगतप्रश्नाः-२

१५. महाराजः युधिष्ठिरः कं यज्ञं सम्पादयामास।

१६. शिशुपालवधकाव्यं कति सर्गात्मकम्।

१७. पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य कस्मिन् नगरे वासं कृतवन्तः।

१८. राजसूययज्ञे के आहूताः आसन्।

१९. यज्ञेऽस्मिन् कः सर्वकर्मद्रष्टा आसीत्।

२०. शास्त्रानुसारेण यज्ञसमाप्तौ कस्मै अर्घ्यप्रदानस्य नियमोऽस्ति।

२१. शास्त्रानुसारं के पूजनार्हा भवन्ति।

२२. भगवान् श्रीकृष्ण एव महत्तम इति केन उद्घोषितम्।

२३. शिशुपालः कस्य निन्दां कृतवान्।

२४. "अद्य मया विहिता भगवतः श्रीकृष्णस्य पूजा न यस्मै रोचते सः धनुर्धारयेत्" इति केन उक्तम्।

२५. शिशुपालेन प्रेषितो दूतः कथं श्रीकृष्णं निन्दयामास।

२६. सात्यकिः किं कृतवान्।

२७. कदा भगवान् श्रीकृष्णः शिशुपालस्य शिरश्छेदं कृतवान्।

२८. भगवान् श्रीकृष्णः केन अस्त्रेण शिशुपालस्य शिरश्छेदं कृतवान्।

२९. शिशुपालस्य शरीरादेकस्तेजःसमूहो निःसृत्य कुत्र अन्तर्निहितः।

३०. शिशुपालवधकाव्ये शिशुपालस्य शिरश्छेदानन्तरं कया घटनया विस्मिताः बभूवुः।

३.३) माघकाव्यस्य गुणाः

बहुशास्त्रवित्कविः माघः। तस्य काव्ये वेदः, पुराणम्, दर्शनम्, अलंकारः, संगीतं, समरशास्त्रं, छन्दः, ज्यौतिषम् इति सर्वेषां शास्त्राणां स्पर्शो विद्यते। श्रमसाध्यमपीदं काव्यं चमत्कारपूर्णमिति कवेः शक्तिमत्ता स्फुटा। व्याकरणस्य नानाविधाः प्रयोगा अत्र प्रायशः दरीदृश्यन्ते। काव्येऽस्मिन् स्पष्टता, मधुरता, ऊर्जस्वलता च सर्वत्र प्रकटीभवन्ति। अधःस्थितं पद्यं पठित्वा ज्ञातुं शक्यते यत् चमत्कृतिः कथं अस्य काव्ये प्रकाशिता।

क्रूरारिकारी कोरेक कारकः कारिकाकरः।

कोरकाकारकरकः करीरः कर्करोहर्करुक्।।

(कृष्ण अजेयानां रिपूणां विनाशकः, जगदधिपतिः, दुष्टानां पीडकः, पद्ममुकुल इव चरणौ यस्य तस्य देहबलेन हस्तिन अपि पराजिता भवन्ति। शत्रूणां पुरतः भयङ्करः इति श्लोकस्य अर्थः।)

केचित् कथयन्ति यत् काव्यगौरवेण निष्णातं भारविविरचितं किरातार्जुनीयम् अवगाहयितुम् एव शिशुपालवधकाव्यं रचयितुमअ उद्युक्तोऽभवत् कविः। काव्येऽस्मिन् पर्वतानाम् ऋतूनां वनविहारस्य जलक्रीडायाः सन्ध्यायाः प्रभातस्य च महोहराणि वर्णनानि सन्ति। अलंकारप्रयोगनिपुणोऽयं कविः अस्ताचलगमनोन्मुखस्य सूर्यस्य तथा उदयाचलावरूढस्य चन्द्रस्य वर्णनं हस्तिनः कर्णयोः आबद्धया घण्टया सह निरुपम्य घण्टामाघ इति प्रसिद्धिं गतः।

सोऽयं श्लोकस्तावत्-

उदयति विततोर्ध्वरश्मिरज्जवहिमरूचौ हिमधाम्नि याति चास्तम्।

वहति गिरिरयं विलम्बितघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।।

(श्रीकृष्णस्य सारथिना दारुकेण उक्तं- रज्जुः इव किरणानि विकिरयन्त्याः सूर्यस्य उदयं तथा चन्द्रस्य अस्तगनसमये एककालं रैवकपर्वतः, कर्णयोः आबद्धघण्टस्य हस्तिन इव शोभते।)

उनविंशे सर्गे कविः शब्दालंकारस्य प्रयोगे महतीं कुशलतां प्रदर्शितवान्। तत्र चित्रबन्धस्य एकः सुन्दरः प्रयोगः दृश्यते। कुत्रापि एकेन वर्णेन कुत्रापि वा वर्णद्वयेन श्लोकं रचयामास। तस्य उदाहरणानि तावत्-

दाददो दद्दुद्दादी दादादो दूददीददोः।

दुद्दादं ददे दुद्दे ददाददददोऽददः॥१९.११४ ॥

राजराजी रुरोजाजेरजिरेऽजोऽजरोऽरजाः।

रेजारिजूरजोर्जार्जी रराजर्जुरजर्जरः॥१९.१०२ ॥

शब्दस्य अर्थस्य च सार्थकः समन्वय एव कवेः सृष्टौ प्रमाणमिति कविना उक्तम्।

पाठगतप्रश्नाः-३

३१. बहुशास्त्रवित्कविः माघ इति कथं ज्ञायते।

३२. माघस्य काव्ये अन्येषां केषां शास्त्राणां स्पर्शो विद्यते।

३३. किरातार्जुनीयं केन विरचितम्।

३४. कं ग्रन्थमवगाहयितुं माघः शिशुपालवधकाव्यं रचयामास।

३५. शिशुपालवधकाव्ये केषां केषां वस्तूनां वर्णनं दृश्यते।

३६. माघः कथं घण्टामाघ इति प्रसिद्धिं गतः।

३७. माघकवेः सूर्यास्तपूर्वकचन्द्रोदयवर्णनपरकं श्लोकं लिखत।

३८. शिशुपालवधकाव्ये चित्रबन्धेन विहितः श्लोकः उदाह्रियताम्।

३.४) श्रीहर्षः

३.४.१) सामान्यपरिचयः

श्रीहर्षः नैषधीयचरितस्य तथा खण्डनखण्डखाद्यग्रन्थस्य च कर्तारूपेण प्रसिद्धो वर्तते। श्रीहर्षः द्वादशे शतके कान्यकुब्जनगरे आसीत्। पितरौ तस्य आस्ताम् यथाक्रमं श्रीहीरः मामल्लदेवी च। पिता श्रीहीरः वाराणस्यां राज्ञः जयन्तचन्द्रस्य सभायामासीत्। तत्रैव मिथिलायाः आगतात् नैयायिकात् उदयनाचार्यात् पराभवमनुभूय क्षुब्धो जातः। आसन्ने च मरणकाले स्वपुत्रं सुपुत्रं श्रीहर्षं तस्य तां मर्यादां पुनरुद्धारार्थं अनुरुरोध। श्रीहर्षः चिन्तामणिमन्त्रस्य जपं विधाय देव्याः त्रिपुरायाः अनुग्रहेण महतीं प्रतिभां सम्प्राप्य कान्यकुब्जराजस्य सभायां पुनराजगाम। तत्रैव तस्यानुग्रहेण नैषधीयचरितं रचयामास। तथैव खण्डनखण्डकाव्येन उदयनाचार्यं खण्डितवान्। सर्वतः प्रधानमस्य कवेर्विषये वक्तव्यमस्ति यत् देवभाषासाहित्यस्य अपकर्षणकाले अन्धकारयुगे प्रादुर्भूतोऽयं महाकविस्तादृशमालोकं दत्तवान् यत् सर्वा दिशा एव चाकचिक्यपूर्णा जाताः।

३.४.२) श्रीहर्षस्य देशः

कान्यकुब्जाधिपतेः सभायां सभापण्डित आसीत् इति कृत्वा श्रीहर्षः कान्यकुब्जाधिवासी आसीदिति ज्ञायते।

३.४.३) श्रीहर्षस्य कालः

कान्यकुब्जाधिपतेः जयन्तचन्द्रस्य सभायामासीत् इति कृत्वा जयन्तचन्द्रस्य कालानुसारं तस्य कवेः कालं निर्णेतुं शक्यते। राजा जयन्तचन्द्र ११६३ ईशवीयात् ११९४ ईशवाब्दं यावत् राज्यशासनं चकार। अतः तत्काल एव काल इति अनुमातुं शक्यते। तथा च ११६३तः ११७४ईशवीयाब्दाभ्यन्तरं कदाचित् नैषधीयचरितं रचयामास इति व्यूहलारस्य मतम्।

३.४.४) श्रीहर्षस्य कृतयः

श्रीहर्षस्य नव ग्रन्थाः प्राप्यन्ते। तन्मध्ये नैषधीयचरितं खण्डनखण्डकाव्यमेव प्रसिद्धम्। तत्र नैषधीयचरिते अन्तिमे सर्गे कविना श्रीहर्षेण स्वयमेव तस्य अन्यासां कृतीनां विषये उक्तम्। तस्य काव्यानि हि-

स्थैर्यविचारप्रकरणम् - नामतो दार्शनिकग्रन्थोऽयं प्रायः क्षणभङ्गवादखण्डनपरः।

विजयप्रशस्तिः - जयचन्द्रस्य पितुः विजयचन्द्रस्य प्रशंसापरकं काव्यम्।

खण्डनखण्डखाद्यम् - स्वनामख्यातोऽनिर्वचनीयतासर्वस्वभूतो वेदान्तग्रन्थः।

गौडोर्वीशकुलप्रशस्तिः - वङ्गीयस्य कस्यचिद्राज्ञः स्तुतिपरं काव्यम्।

अर्णववर्णनम् - स्वनामख्यातम्।

छिन्दप्रशस्तिः - अज्ञातपरिचयस्य कस्यापि राज्ञो वर्णनपरोऽयं ग्रन्थः स्यात्।

शिवशक्तिसिद्धिः - शिवशक्त्योरुपासनाग्रन्थोऽयं सम्भाव्यते।

नवसाहसाङ्कचरितचम्पूः(नाम्ना एव विषयः स्वरूपञ्च आख्यायेते।)

नैषधीयचरितम् - अत्र महाकाव्ये निषधशासकस्य नलस्य चरित्रं प्रस्तूयते। अस्मिन् ग्रन्थे द्वाविंशतिः सर्गाः २८३० श्लोकाश्च सन्ति। एतावतापि ग्रन्थेन नलचरितैकदेश एव वर्ण्यते। नलदमयन्त्योः परिणयावधिवृत्तान्तः सम्भोगचित्रं नलस्य च धर्मप्राणतायाः वर्णनमय्या पद्धत्या वर्णितोऽत्र ग्रन्थे। राजनि नले दमयन्तीरक्ते दमयन्तीचिन्तया दूयमाने स्वारामं पर्यटति सति तेन हंसो गृह्यते दयया मुच्यते च। स एव प्रत्युपकारभावनया नलस्य स्तुतिं दमयन्तीसमीपे करोति। दमयन्त्याः पूर्वरागः उदयते। दमयन्त्याः पिता विदर्भः स्वयंवरमारचयति। दमयन्तीकामुका देवा अपि तत्र आयान्ति, धृतनलस्वरूपाश्चत्वार इन्द्रयमवायुकुवेराः पञ्चमो नलश्चेति सर्वेषां समरूपतया दमयन्ती विचित्रां दशां प्रपद्यते। सभावर्णनाय समागता सरस्वत्यपि श्लेषवर्णनया दमयन्तीं व्यामोहयति। अवसाने दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीत्या देवाः स्वानि विशिष्टचिह्नानि प्रकटीकुर्वन्ति यैर्नलः परिचितः भवति। नलदमयन्त्योः सुखसङ्गमेन च ग्रन्थः समाप्यते।

पाठगतप्रश्नाः-४

३९. श्रीहर्षस्य द्वौ ग्रन्थौ उल्लिखत।

४०. श्रीहर्षः कस्मिन् नगरे बभूव।

४१. श्रीहर्षस्य पितुः नाम किम्।

४२. श्रीहर्षस्य मातुः नाम किम्।

४३. श्रीहर्षस्य पिता कस्य राज्ञः सभायामासीत्।

४४. श्रीहर्षस्य पिता श्रीहीरः कस्मात्पण्डितात् पराबभूव।

४५. श्रीहर्षः कस्य मन्त्रस्य जपं कृतवान्।

४६. श्रीहर्षः कस्याः देव्याः उपासनां कृतवान्।

४७. श्रीहर्षः केन काव्येन उदयनाचार्यं खण्डितवान्।

४८. श्रीहर्षस्य कालः कः।

४९. श्रीहर्षः कदा नैषधीयचरितं रचयामास।

३.५) श्रीहर्षस्य काव्यस्य वैशिष्ट्यानि

नैषधीयचरितस्य सरसा वर्णनपद्धतिः शृङ्गारप्रकर्षपूर्णकथा च सहृदयहृदयानि अवर्जयेताम्। यथैव श्रीहर्षस्य खण्डनखण्डकाव्यमद्वितीयं तथैव नैषधीयमपि स्वक्षेत्रेऽनुपमम्। श्रीहर्षः यथैव दार्शनिककविः तथैव योगी अपि आसीदिति यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवमिति पद्याज्ज्ञायते।

श्रीहर्षः स्वीयस्य शास्त्रज्ञानस्य परिचयं प्रतिसर्गं ददाति, परन्तु सप्तदशसर्गे तु तेन स्वीयं नास्तिकास्तिकसकलदर्शनप्रवीणत्वं व्याकरणनिष्णातत्वं च प्रकटीकृतम्।

वेदान्तिना श्रीहर्षेण नैयायिका वैशेषिकाश्च कवितायामप्युपहसिताः-

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्।

गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः।।

ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारुमतं मे।

औलुकमाहुः खलु दर्शनं तत् क्षमं तमस्तत्त्वनिरूपणाय।।

श्रीहर्षस्य कवितायां नारीरूपस्य वर्णनमतीव सजीवम्। चतुर्थसर्गे विप्रलम्भशृङ्गारस्य वर्णनमतीव रमणीयम्। तत्र एकः श्लोकः तावत् -

मयाङ्गं पृष्टः कुलनामनी भवानमू विमुच्यैव किमन्यदुक्तवान्।

पुपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि।।

बहवः शास्त्रसम्मताः तर्का अत्र काव्ये यत्र यत्र कविना सप्रयासं समावेशिताः सहृदयानां मनांसि रञ्जयन्ति। उत्प्रेक्षाणामपि चमत्कारोऽस्य नितान्तं हृद्यः -

यदस्य यात्रासु बलोद्धतं रजः स्पुतप्रतापानलधूममञ्जिम।

तदेव गत्वा पतितं तधाति पङ्कीभवङ्कतां विधौ।।

यद्यपि नैषधकाव्यं सौमबद्धताया अभावात् कठिन्यादेकस्यैवनार्थस्य शब्दान्तरेणावर्तनाच्च माघकिताुर्जुनीयापेक्षया न्यूनमर्यादं मन्तव्यं भवति तथापि नैषधे स्तितं रसोल्वणत्वं सर्वमतिशय्य वर्त्तते। तस्मादाभाणकमिदम्-

उदिते नैषधे काव्ये क्व माघः क्व च भारविः।।

३.६) क्षेमेन्द्रः

३.६.१) सामान्यपरिचयः

क्षेमेन्द्रः एकादशशतकस्य ख्यातनामा कविः आसीत्। क्षेमेन्द्रः सिन्धोः पौत्रः प्रकाशेन्द्रस्य पुत्रश्च आसीत्। क्षेमेन्द्रस्य पिता प्रकाशेन्द्रः ब्राह्मणानां संरक्षक आसीत्। क्षेमेन्द्रः कश्मीरराजस्य अनन्तस्य सभापण्डित आसीत्। तस्य अनन्तस्य शासनकालः १०२७ ईशवीयाब्दतः १०६४ ईशवीयाब्दं यावत् आसीत्।

३.६.२) क्षेमेन्द्रस्य देशः

क्षेमेन्द्रः कश्मीरवासी आसीत्। तत्रत्यस्य राज्ञः अनन्तस्य सभापण्डित आसीत् क्षेमेन्द्रः। कश्मीरदेशो वरपुत्राणां देशः इति भणितिः प्रसिद्धा एव। तेन वरपुत्राणां देशे कश्मीरे जनिं लेभे क्षेमेन्द्रः।

३.६.३) क्षेमेन्द्रस्य कालः

पूर्वमेव उक्तमस्ति यत् क्षेमेन्द्रः कश्मीरराजस्य अनन्तस्य सभापण्डित आसीत्। तस्य अनन्तस्य शासनकालः १०२७ ईशवीयाब्दतः १०६४ ईशवीयाब्दं यावत् आसीत्। अतः क्षेमेन्द्रस्य समयः एकादशशतकमिति निश्चित्य वक्तुं शक्यते।

३.६.४) क्षेमेन्द्रस्य कृतयः

क्षेमेन्द्रस्य बह्व्यः कृतयः प्राप्यन्ते। ताश्च शशिवंशमहाकाव्यम् अमृतरङ्गकाव्यम् अवसरसारः मुक्तावली लावण्यवती देशोपदेशः पवनपञ्चाशिका पद्मकादम्बरी अवदानकल्पलता नीतिकल्पतरुः लोकप्रकाशकोशः सेव्यसेवकोपदेशः विनयवल्ली दर्पदलनम् कविकण्ठाभरणम् रामायणमञ्जरी भारतमञ्जरी बृहत्कथामञ्जरी समयमातृका दशावतारचरितम् इति।

३.६.५) क्षेमेन्द्रस्य काव्यस्य गुणाः

क्षेमेन्द्रस्य अवदानकल्पलता सार्धशतवर्षाभ्यन्तरे एव तिब्बतभाषानुवादावसरं लेभे इति क्षेमेन्द्रस्य धार्मिकोदारतायाः सुन्दरकाव्यशैल्याश्च प्रबलं प्रमाणम्।

दशावतारचरितन्नाम महाकाव्यं क्षेमेन्द्रस्यान्तिमा मधुरतमा च कृतिः। अस्मिन् स्वतन्त्रे महाप्रौढे च महाकाव्ये विष्णोर्दशावताराः रोचकशैल्या वर्णिताः। क्षेमेन्द्रस्य भाषा मधुरा, सरसा सुबोधा चासीत्। उदाहरणमेकं यथा -

दयितजनवियोगोद्वेगरोगातुराणां विभवविरहदैन्यम्लायमानाननानाम्।
शमयति शितशल्यं हन्त नैराश्यनश्यद्भवपरिभवतान्तिः शान्तिरन्ते वनान्ते।।

पाठगतप्रश्नाः-५

५०. क्षेमेन्द्रः कस्य राज्ञः सभापण्डित आसीत्।

५१. कस्मिन् देशे क्षेमेन्द्रः जनिं लेभे।

५२. क्षेमेन्द्रस्य कालः कः।

५३. क्षेमेन्द्रस्य काश्चन कृतीः लिखत।

५४. क्षेमेन्द्रस्य मधुरतमायाः कृतेः नाम किम्।

३.७) कल्हणः

३.७.१) सामान्यपरिचयः-

ऐतिहासिककविषु अन्यतमः कविः कल्हणः। संस्कृतभाषायाम् इतिहासलेखनाय यावन्तः विद्वांसः व्यवसितवन्तः तेषां मध्ये कल्हणः प्रमुख इति नितान्तसत्यं वस्तु। कल्हणः स्वयमेव स्वीयम् इतिवृत्तं निर्दिष्टवान्। कल्हणस्य पिता आसीत् चणपकः। चणपकः तात्कालीककाश्मीराधिपतेः हर्षस्य प्रधानामात्यः आसीत्। कल्हणस्य पितृव्यः कणकोऽपि राज्ञः हर्षस्य आश्रये आसीत्। हर्षे शत्रुभिः कपटेन हते सति चणपकः राजाश्रयहीनः सञ्जातः। परं कल्हणः अलकदत्तनाम्नः कस्यचित्सत्पुरुषस्य छत्रछायाम् आश्रितवान्। कल्हणः रामायणमहाभारतादिग्रन्थान् सम्यक् अधीतवान्। समं हि ज्यौतिषशास्त्रेऽपि तस्य पाण्डित्यम् आसीत्।

३.७.२) कल्हणस्य देशः-

कल्हणोऽयं काश्मीरदेशे आढ्यब्राह्मणवंशे अजायत। तस्य काश्मीरवासित्वे नास्ति कोऽपि सन्देहः।

३.७.३) कल्हणस्य कालः-

राज्ञः सुस्सलस्य पुत्रे जयसिंहे राजति कल्हणः राजतरङ्गिणीं निर्मितवान्। जयसिंहस्य शासनकालः आसीत् ११२७ तमेशवीयवर्षतः ११५९ तमेशवीयवर्षपर्यन्तम्। अतः कल्हणस्य कालः ईशवीयद्वादशशतकम् इति निश्चयेन वक्तुं शक्यते।

३.७.४) कल्हणस्य कृतिः-

ऐतिहासिककवेः अस्य राजतरङ्गिणी इति एकमेव ऐतिहासिककाव्यं प्राप्यते। सर्वमपि प्राक्तनम् इतिहासग्रन्थनिवहं निपुणं निरीक्ष्यैव राजतरङ्गिणीं प्रणीतवान्। कल्हणेन ११४८-तमेशवीयवर्षे प्रारब्धा

राजतरङ्गिणी ११५०-तमेशवीयवर्षे समापिता। अत्र काव्यतायाः यावानंशो वर्तते तावानंशः ऐतिहासिकतायाः अपि।

३.७.५) राजतरङ्गिणीग्रन्थः-

ग्रन्थोऽयं विशालकायः अष्टसु तरङ्गेषु विभक्तो विद्यते। अत्र कल्हणः प्राचीनकालादारभ्य तत्समयपर्यन्तस्य काश्मीरदेशस्य काश्मीरशासकानां च इतिहासं लेखितुं प्रयत्नं कृतवान्। अस्य ग्रन्थस्य इतिहासनिबद्धः विक्रमसंवत्सरप्रारम्भात् द्वादशशतकपूर्वभवस्य कस्यचन गोनन्दनामकस्य राज्ञः इतिहासात् प्रक्रमते। अस्मिन् ग्रन्थे प्रथमतरङ्गत्रये निर्दिष्टानां राज्ञामुल्लेखः कालनिर्देशरहितः एव कृतः। तत्र पौराणिककथां जनश्रुतिं च आधारीकृत्य इतिहासं निर्मितवान्। ततःपरं राज्ञाम् इतिहासवर्णने कालनिर्देशः प्राप्यते। सर्वतः प्रथमम् निर्दिश्यमाना तिथिः ८१३-८१४ ईशवीयवर्षम्। ततः अन्तःपर्यन्तं वर्णिताः घटनाः प्रामाणिकरूपेण वैज्ञानिकपद्धत्या निबद्धा विद्यते। अष्टमतरङ्गस्य घटनास्तु कविना भूयसांशेन साक्षात्कृत्य निबद्धा इति तासां सत्यता असन्दिग्धा।

३.७.६) कल्हणस्य काव्यस्य वैशिष्ट्यम्-

सामान्यतः प्रायः सर्वे एव ऐतिहासिकाः स्वदेशस्य प्रतिष्ठां वर्धयितुं स्वीयदेशे अवर्तमानानपि गुणान् वर्णयितुं न सङ्कुचन्ति। किन्तु कल्हणः तादृशः नासीत्। स हि नितान्तनिष्पक्षपातितया इतिहासं रचितवान्। स स्वयमेव लिखति-

"श्लाघ्यः स एव गुणवान् रागद्वेषविवर्जितः।

भूतार्थकथने यस्य स्थेयस्येव सरस्वती।।" इति।

राजतरङ्गिणीग्रन्थे तत्कालीनानां राज्ञां गुणदोषाः, राजसेवकानां च कृतघ्नतास्वामिभक्तिः सर्वं यथायथं वर्णितम्। अस्मिन् काव्ये निन्दा स्तुतिः उभयम् अपि निष्पक्षपाततया लिखितम्।

अस्मिन् ग्रन्थे इतिहासेन समं काव्यत्वमपि समानतया वर्तते। यथा-

"राज्याच्च्युतस्य बहूशः परिवाररामा

कोशादि तस्य रिपवो व्रजतोऽपजह्रुः।

उर्वीरूहोविगलितस्य नगेन्द्रशृङ्गा-

द्वल्लीफलादि रभसादिव गण्डशैलाः।।" इति।

पाठगतप्रश्नाः-६

५५. कल्हणः कस्मिन् देशे अजायत।

५६. कल्हणस्य कृतेः नाम किम्।

५७. राजतरङ्गिणी इति कीदृशं काव्यम्।

५८. राजतरङ्गिण्यां कति तरङ्गाः सन्ति।

५९. कल्हणस्य पितुः पितृव्यस्य च नाम लिखत।

३.८) भट्टिस्वामी

३.८.१) सामान्यपरिचयः-

भट्टिकाव्यस्य प्रणेतुः भट्टिस्वामिनः पिता आसीत् श्रीधरस्वामी। भट्टिस्वामिनः जीवनचरितविषये प्रामाणिकं किमपि मतं नास्ति। तस्य जीवनविषये काश्चित् कथाः श्रूयन्ते। भट्टिस्वामिनः जन्मनः परमेव तस्य मातृवियोगः सञ्जातः। तस्य पिता श्रीधरस्वामी अपि नवजातकं स्वपुत्रं परित्यज्य सन्यासं स्वीकृतवान्। तत्र श्रीधरसेननामा कश्चित् राजा आसीत्। सः भट्टिस्वामिनः पोषणं कृतवान्।

कवेरस्य व्याकरणशास्त्रे आसीत् प्रगाढं पाण्डित्यम्। तस्य काव्यमेव तत्र प्रमाणम्। समं हि अलङ्कारादिष्वपि शास्त्रेषु तस्य पाण्डित्यम् आसीत्।

३.८.२) भट्टिस्वामिनः देशः-

कविरयं सौराष्ट्रजनपदस्य अन्तर्गते वलभीनगरे जनिं लब्धवान् इति रूढिः।

३.८.३) भट्टिस्वामिनः कालः-

अयं कविः राज्ञः श्रीधरसेनस्य आश्रये आसीदिति सः स्वयमेव स्वीयकाव्ये लिखति। श्रीधरसेननामकाश्चत्वारो राजानः प्रसिद्धाः। ते च ५००-६५० ईशवीयाब्दपर्यन्तम् अजायन्त। तेषु कतमस्य श्रीधरसेनस्य समये आसीदिति न निश्चितम्। श्रीधरसेनद्वितीयस्य एकः शिलालेखः प्राप्यते यत्र भट्टिनाम्ने विदुषे राज्ञा कृतस्य भूमिदानस्य वार्ता मिलति। यदि अयं भट्टिः भट्टिकाव्यस्य प्रणेता भट्टिः स्यात् तर्हि तस्य समयः ६१० ईशवीयाब्दः इति मन्तुं शक्यते। भिन्नभट्टेः कल्पनायामपि भट्टिः सप्तमशतकादूर्ध्वं नानेतुं योग्यः। अतः भट्टिस्वामी ईशवीयसप्तमशतके आसीदिति वक्तुं शक्यते।

३.८.४) भट्टिस्वामिनः कृतिः-

भट्टिकाव्यम् इति तस्य कृतिः। शास्त्रकाव्येषु भट्टिकाव्यं प्रसिद्धतरम्। अस्य काव्यस्य निर्माणे उद्देश्यमासीत् मनेविनोदेन सह व्याकरणस्य ज्ञानम्। व्याकरणशास्त्रस्य प्रयोगः अस्मिन् काव्ये सम्यक्तया दृश्यते। स्वस्य काव्यविषये भट्टिस्वामी स्वयमेव लिखति-

"दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।

हस्तादर्श इवान्धानां भवेद्व्याकरणादृते" इति।

अर्थात् व्याकरणे व्युत्पन्नानां कृते काव्यमिदं प्रदीपतुल्यम्। किन्तु व्याकरणज्ञानरहितानां कृते अन्धस्य हस्ते दर्पणः इव। काव्यमिदं भट्टिस्वामिना प्रणीतम् इति हेतोः तन्नाम्नैव प्रसिद्धिः जाता। काव्यमिदं रावणवधनाम्नापि प्रथते।

इदं काव्यं वाल्मीकिमहर्षेः रामायणमाश्रित्य निर्मितम्। अत्र रामायणकथा एव वर्णिता। काव्येऽस्मिन् द्वादशसर्गाः सन्ति।

३.८.५) भट्टिस्वामिनः काव्यस्य वैशिष्ट्यम्-

काव्यस्यास्य प्रधानं वैशिष्ट्यं हि व्यवहारे व्याकरणस्य यानि रूपाणि प्राप्यन्ते तैः सह अप्रचलिताः व्याकरणस्य प्रायः सर्वे एव प्रयोगाः अत्र लभ्यन्ते। मल्लिनाथस्य मतानुसारं भट्टिकाव्यं हि "उदाहरणकाव्यम्"। अन्ये अपि टीकाकाराः वदन्ति यत् प्रयोगद्वारा व्याकरणस्य शिक्षादानाय कविना काव्यमिदं निर्मितम् इति। भट्टिकाव्यस्य मुख्यतया चत्वारः भेदाः। प्रकीर्णकाण्डः, अधिकारकाण्डः, प्रसन्नकाण्डः, तिङन्तकाण्डश्च। तेषु आदितः पञ्चमसर्गपर्यन्तं प्रकीर्णकाण्डः। तत्र व्याकरणस्य विविधाः नियमाः प्रयोगैः उदाहृताः। पञ्चमसर्गतः नवमसर्गपर्यन्तम् अधिकारकाण्डः। तत्र प्रत्ययानां व्यवहारः, आत्मनेपदपरस्मैपदविधानं, णत्वविधानं, षत्वविधानं च प्रयोगैः दर्शितम्। दशमसर्गतः त्रयोदशसर्गपर्यन्तं प्रसन्नकाण्डः। अस्मिन् अंशे अलङ्काराणां प्रयोगः दृश्यते। अष्टादशसर्गतः अन्तिमं यावत् तिङन्तकाण्डः। अत्र दशानां लकाराणां प्रयोगः प्राप्यते। न हि भट्टिकाव्यं केवलं व्याकरणलक्षणप्रयोगज्ञानाय निर्मितम् अपि तु अलङ्कारः, रसः, छन्दः, काव्यगुणाः, व्यञ्जना, चित्रम् इत्यादीनि अपि अत्र भूयशः प्राप्यन्ते। काव्यस्यास्य दशमे सर्गे शब्दार्थालङ्काराणां निवेशेन एकादशसर्गे माधुर्यगुणस्य समावेशेन च अस्य गौरवमेधते।

भट्टिकाव्ये यमकालङ्कारस्य एकम् उदाहरणं यथा-

"अवसितं हसितं प्रसितं मुदा विलसितं ह्रसितं स्मरभासितम्।
न समदाः प्रमदा हतस्मदाः पुरोहितं विहितं न समीहितम्।।" इति।

लुङ्लकारस्य प्रयोगः यथा-

"माज्ञासीस्त्वं सुखी रामो यदकार्षीत् स रक्षसाम्।
उदतारीदुदन्वन्तः पुरं न परितोऽरुधत्।।" इति.

अस्य काव्यस्य शरद्वर्णनं नितान्तहृद्यम्-

"तरङ्गसङ्गाचचपलैः पलाशैर्ज्वालाश्रियं सातिशयं दधन्ति।
सधुमदीप्ताग्निरुचीनि रोजुस्ताम्रोत्पलान्याकुलषट्पदानि।।" इति।

एवमेव सूर्योदयवर्णनमपि-

"दुरुत्तरे पङ्क इवान्धकारे मग्नं जगत्सन्ततरश्मिरज्जुः।
प्रणष्टमूर्तिप्रविभागमुद्यन् समुज्जहारेव ततो विवस्वान्।।" इति।

भट्टिकाव्यस्य निम्नलिखितश्लोकस्तु एकावलीनामकस्य अलङ्कालस्य प्रसिद्धमुदाहरणम्-

"न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्त जहार यन्मनः।।" इति।

काव्येऽस्मिन् महाकाव्यस्य वैशिष्ट्यमपि वर्तते इति हेतोः भट्टिकाव्यं महाकाव्यमेव।

पाठगतप्रश्नाः-७

६०. भट्टिस्वामिनः पितुः नाम किम्।
६१. भट्टिस्वामी कस्य राज्ञः आश्रये आसीत्।
६२. भट्टिस्वामी कस्मिन् देशे अजायत।
६३. भट्टिस्वामी कस्मिन् शतके जनिं लब्धवान्।
६४. भट्टिकाव्यं कीदृशं काव्यम्।
६५. भट्टिस्वामिनः कृतेः नाम किम्।
६६. दीपतुल्यः प्रबन्धोऽयम् इति कस्य विषये उक्तम्।
६७. भट्टिकाव्यं किमाश्रित्य निर्मितम्।
६८. एकावलीनामकस्य अलङ्कारस्य प्रसिद्धमुदाहरणं भट्टिकाव्यतः दीयताम्।

पाठसारः

माघः

अस्मिन् पाठे वयं कवेः माघस्य जीवनचरितं, तस्य देशः, तस्य कालः.तस्य कृतयः, तस्य काव्यस्य वैशिष्ट्यानि, शिशुपालवधकाव्यस्य वैशिष्ट्यानि इत्यादयः विषयाः पठिताः। माघस्य पिता दत्तकः विद्वान् दानप्रसिद्धश्चासीत्। मीनमल्लाख्यनगरे जन्मग्रहणमकरोत्। गुर्जरनिवासी अयं कविः श्रीमालनगरे वासं कृतवान्। सप्तशकस्य अन्तिमात् अष्टमशतकपर्यन्तम् माघस्य समयः इति विदुषां मतम्। शिशुपालवध इति एकेनैव काव्येन माघकविः प्रथितयशा बभूव।

महाभारतम् उपजीव्य विरचिते अस्मिन् ग्रन्थे युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधः मुख्यतया वर्णितः। महाभारतोक्तां निष्प्राणामिमां कथां माघो वर्णनमाहात्म्येन चमत्कारिणीं विहितवान्।

श्रीहर्षः

अस्मिन् पाठे श्रीहर्षस्य जीवनवृत्तान्तः देशः कालः कृतयश्च वर्णिताः। श्रीहर्षः कान्यकुब्जाधिवासी आसीत्। श्रीहीरः तस्य पिता माता च मामल्लदेवी आसीत्। उदयनाचार्यात् पराभवम् अनुभवितुः स्वपितुः श्रीहीरस्य सम्मानरक्षार्थं श्रीहर्षेण नैषधीयचरितं विरचितम्। देवभाषासाहित्यस्य अपकर्षणकाले अन्धकारयुगे प्रादुर्भूतोऽयं महाकविः भाषायां पुनरुद्धारं कृतवान्। राजा जयन्तचन्द्रस्य काल एव अस्य कवेः काल इति स्थिरीकृत्य अयं श्रीहर्षः द्वाविंशशतककाले आसीदिति अनुमातुं शक्यते। श्रीहर्षस्य नव ग्रन्थाः प्राप्यन्ते। तत्र नैषधीयचरितं तथा खण्डनखण्डकव्यमेव अधिकतया प्रथन्ते। तद्विहाय अन्ये ग्रन्थाः तावत् स्थैर्यविचारप्रकरणम्, विजयप्रशस्तिः, गौडोर्वीशकुलप्रशस्तिः, अर्णववर्णनम्, छिन्दप्रशस्तिः, शिवशक्तिसिद्धिः, नवसाहसाङ्कचरितचम्पूः इति।

तत्र नैषधीयचरिताख्ये ग्रन्थे द्वाविंशतिः सर्गाः २८३० श्लोकाश्च सन्ति। नलदमयन्त्योः परिणयावधिवृत्तान्तः सम्भोगचित्रं नलस्य च धर्मप्राणतायाः वर्णनमय्या पद्धत्या वर्णितोऽत्र ग्रन्थे। दमयन्तीचिन्तया राज्ञः नलस्य राजहंसपरित्यागवर्णनम् प्रसिद्धम्। नलस्य देवैः सह औपम्यम् इत्यादीनि वर्णनानि प्रसिद्धानि। नलदमयन्त्योः सुखसङ्गमेन च ग्रन्थः समाप्यते।

श्रीहर्षस्य काव्यवैशिष्ट्यानि अपि अत्र समुपवर्णितानि। वर्णनपद्धत्या अलंकारप्रयोगादिना निरूपमाः कृतयः कृताः।

क्षेमेन्द्रः

क्षेमेन्द्रः एकादशशताब्दौ जनिं लेभे। स कश्मीरदेशीयः। तस्य नैकाः कृतयः लोकप्रसिद्धाः काव्यगुणसम्पन्नाः च। सर्वासु कृतिषु दशकुमारचरितमिति काव्यम् तस्यैव काव्यान्तराणि अतिशेते।

कल्हणः

ऐतिहासिककविषु अन्यतमः कविः कल्हणः। ईशवीयद्वादशशतके काश्मीरदेशे सः जनिं लब्धवान्। तस्य पिता चणपकः आसीत् राज्ञः हर्षस्य प्रधानामात्यः। अलकदत्तनामा कश्चित्सत्पुरुषः कल्हणस्य पोषकः आसीत्। कल्हणस्य कृतेः नाम राजतरङ्गिणी। अत्र अष्टौ तरङ्गाः सन्ति। राजनि जयसिंहे राजति कल्हणः राजतरङ्गिणीं निर्मितवान्। अस्मिन् काव्ये गोनन्दनामकराज्ञः आरभ्य तत्कालपर्यन्तस्य काश्मीरदेशस्य राज्ञां च इतिहासः वर्णितः।

भट्टिस्वामी

भट्टिस्वामी सौराष्ट्रजनपदस्य अन्तर्गते वलभीनगरे सप्तमशतके अजायत। भट्टिस्वामिनः पिता आसीत् श्रीधरस्वामी। पितरि सन्न्यस्ते राजा श्रीधरसेनः तस्य पोषणं कृतवान्। तस्य कृतेः नाम भट्टिकाव्यम्। रावणवधमिति भट्टिकाव्यस्य अपरं नाम। शास्त्रकाव्येषु भट्टिकाव्यं प्रसिद्धतरम्। काव्यमिदं

कविपरिचयः-३

वाल्मीकिमहर्षेः रामायणमाश्रित्य निर्मितम्। काव्येऽस्मिन् द्वादशसर्गाः सन्ति। अत्र व्याकरणशास्त्रस्य सम्यक् प्रयोगः अत्र दृश्यते।

पाठगतप्रश्नानामुत्तराणि

उत्तरस्तबकः-१

१. माघस्य पिता आसीत् दत्तकः।

२. माघस्य पितामहः आसीत् सुप्रभदेवः।

३. माघस्य पितामहः राज्ञः वर्मलातः सभायाम् आसीत्।

४. माघस्य जन्म मीनमल्लाख्ये नगरे बभूव।

५. माघः निवासस्थलं आसीत् श्रीमालनगरम्।

६. आनन्दवर्धनकृतस्य ग्रन्थस्य नाम हि ध्वन्यालोकः।

७. वामनकृतस्य ग्रन्थस्य नाम तावत् काव्यालंकारः।

८. आनन्दवर्धनकृते ध्वन्यालोके माघस्य पद्यानाम् उद्धृतत्वात् माघः आनन्दवर्धनस्य पूर्वकालिक इति ज्ञायते।

९. सप्तशकस्य अन्तिमात् अष्टमशतकपर्यन्तम् माघस्य कालः।

१०. माघस्य एका एव कृतिः प्राप्यते तच्च भवति शिशुपालवधकाव्यम्।

११. युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वध एव शशुपालवधकाव्यस्य मुख्यो विषयः।

१२. शिशुपालवधकाव्यस्य उपजीव्यः ग्रन्थः तावत् व्यासविरचितं महाभरतम्।

१३. शिशुपालवधस्य नायकः भगवान् श्रीकृष्णः।

१४. शिशुपालवधस्य प्रतिनायकः शिशुपालः।

उत्तरस्तबकः-२

१५. महाराजः युधिष्ठिरः राजसूययज्ञं सम्पादयामास।

१६. शिशुपालवधकाव्यं विंशतिसर्गात्मकम्।

१७. पाण्डवाः प्रथमवनवासदिवसावधिं प्रपूर्य इन्द्रप्रस्थनगरे वासं कृतवन्तः।

१८. राजसूययज्ञे जम्बूद्वीपस्य सर्वे राजानः आहूताः आसन्।

१९. यज्ञेऽस्मिन् भगवान् श्रीकृष्णः सर्वकर्मद्रष्टा आसीत्।

२०. शास्त्रानुसारेण यज्ञसमाप्तौ गुणवते अर्घ्यप्रदानस्य नियमोऽस्ति।

२१. शास्त्रानुसारं षडङ्गवेदाध्ययनाध्यापनरतो ब्राह्मणस्नातकः, गुरुः बन्धुः, जामाता, राजा, ऋत्विग्, याज्ञिकश्च एते षट् सदस्याः पूजनार्हा भवन्ति।

२२. भगवान् श्रीकृष्ण एव महत्तम इति भीष्मेण उद्घोषितम्।

२३. शिशुपालः कस्य श्रीकृष्णस्य निन्दां कृतवान्।

२४. " अद्य मया विहिता भगवतः श्रीकृष्णस्य पूजा न यस्मै रोचते सः धनुर्धारयेत्" इति भीष्मेण उक्तम्।

२५. शिशुपालेन प्रेषितो दूतः श्लिष्टशब्दैः भगवन्तं श्रीकृष्णं निन्दयामास।

२६. सात्यकिः शिशुपालस्य आक्षेपाणाम् उचितमुत्तरं प्रादात्।

२७. शतसंख्यकेषु अपराधेषु पूर्णेषु भगवान् श्रीकृष्णः शिशुपालस्य शिरश्छेदं कृतवान्।

२८. भगवान् श्रीकृष्णः सुदर्शनचक्रेण शिशुपालस्य शिरश्छेदं कृतवान्।

२९. शिशुपालस्य शरीरादेकस्तेजःसमूहो निःसृत्य भगवतः श्रीकृष्णस्य शरीरे अन्तर्हितः।

३०. शिशुपालवधकाव्ये शिशुपालस्य शिरश्छेदानन्तरं शिशुपालस्य शरीरोदकतेजःसमूहः निःसृत्य भगवतः श्रीकृष्णस्य शरीरे अन्तर्हितः अनया घटनया सर्वे विस्मिताः बभूवुः।

उत्तरस्तबकः-३

३१. माघस्य काव्ये वेदः, पुराणम्, दर्शनम्, अलंकारः, संगीतं, समरशास्त्रं, छन्दः, ज्यौतिषम् सर्वेषां शास्त्राणां स्पर्शो विद्यते अतः बहुशास्त्रवित्कविः माघ इति ज्ञायते।

३२. माघस्य काव्ये अन्येषां वेदः, पुराणम्, दर्शनम्, अलंकारः, संगीतं, समरशास्त्रं, छन्दः, ज्यौतिषम् इत्यादीनां शास्त्राणां स्पर्शो विद्यते।

३३. किरातार्जुनीयं भारविना विरचितम्।

३४. किरातार्जूनीयाख्यं ग्रन्थमवगाहयितुं माघः शिशुपालवधकाव्यं रचयामास।

३५. शिशुपालवधकाव्ये पर्वतानाम् ऋतूनां वनविहारस्य जलक्रीडायाः सन्ध्यायाः प्रभातस्य इत्यादीनां वस्तूनां वर्णनं दृश्यते।

३६. माघः अस्ताचलगमनोन्मुखस्य सूर्यस्य तथा उदयाचलोररूढस्य चन्द्रस्य वर्णनं हस्तिनः कर्णयोः आबद्धया घण्टया सह निरुपम्य घण्टामाघ इति प्रसिद्धिं गतः।

३७. माघकवेः सूर्यास्तपूर्वकचन्द्रोदयवर्णनपरकं श्लोको हि -

उदयति विततोर्ध्वरश्मिरज्जवहिमरूचौ हिमधाम्नि याति चास्तम्।

वहति गिरियं विलम्बितघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।। इति।

३८. शिशुपालवधकाव्ये चित्रबन्धेन विहितः श्लोको हि -

दाददो दद्दुद्दादी दादादो दूददीददोः।

दुद्दादं ददडे दुद्दे ददाददददोऽददः ॥ १९.११४ ॥ इति

उत्तरस्तबकः-४

३९. श्रीहर्षस्य द्वे ग्रन्थे नैषधीयचरितम्, खण्डनखण्डखाद्यं च।

४०. श्रीहर्षः कान्यकुब्जनगरे बभूव।

४१. श्रीहर्षस्य पितुः नाम श्रीहीरः।

४२. श्रीहर्षस्य मातुः नाम मामल्लदेवी।

४३. श्रीहर्षस्य पिता जयन्तचन्द्रस्य राज्ञः सभायामासीत्।

४४. श्रीहर्षस्य पिता श्रीहीरः उदयनाचार्यात् पराबभूव।

४५. श्रीहर्षः चिन्तामणिमन्त्रस्य जपं कृतवान्।

४६. श्रीहर्षः कस्याः त्रिपुरादेव्या उपासनां कृतवान्।

४७. श्रीहर्षः खण्डनखण्डखाद्यग्रन्थेन उदयनाचार्यं खण्डितवान्।

४८. श्रीहर्षस्य कालो भवति द्वादश ईशवीयाब्दः।

४९. श्रीहर्षः ११६३तः ११७४ ईशवीयाब्दाभ्यन्तरे नैषधीयचरितं रचयामास।

उत्तरस्तबकः-५

५०. क्षेमेन्द्रः राज्ञः अनन्तस्य सभापण्डित आसीत्।

५१. क्षेमेन्द्रः कश्मीरदेशे जनिं लेभे।

५२. क्षेमेन्द्रः एकादशतके आसीत्।

५३. क्षेमेन्द्रस्य कतिपयाः कृतयः शशिवंशमहाकाव्यम्, अमृतरङ्गकाव्यम्, अवसरसारः, मुक्तावली, लावण्यवती, देशोपदेशः, पवनपञ्चाशिका, दशावतारचरितम् इत्यादयः।

५४. क्षेमेन्द्रस्य मधुरतमायाः कृतेः दशावतारचरितम्।

उत्तरस्तबकः-६

५५. कल्हणः काश्मीरदेशे अजायत।

५६. कल्हणस्य कृतेः नाम राजतरङ्गिणी।

५७. राजतरङ्गणी इति एकम् ऐतिहासिककाव्यम्।

५८. राजतरङ्गिण्याम् अष्टौ तरङ्गाः सन्ति।

५९. कल्हणस्य पितुः नाम चणपकः इति पितृव्यस्य च नाम कणकः इति।

उत्तरस्तबकः-७

६०. भट्टिस्वामिनः पितुः नाम श्रीधरस्वामी।

६१. भट्टिस्वामी राज्ञः श्रीधरसेनस्य आश्रये आसीत्।

६२. भट्टिस्वामी सौराष्ट्रजनपदस्य अन्तर्गते वलभीनगरे अजायत।

६३. भट्टिस्वामी सप्तमशतके जनिं लब्धवान्।

६४. भट्टिकाव्यम् एकं शास्त्रकाव्यम्।

६५. भट्टिस्वामिनः कृतेः नाम भट्टिकाव्यम्।

६६. "दीपतुल्यः प्रबन्धोऽयम्" इति भट्टिकाव्यस्य विषये उक्तम्।

६७. भट्टिकाव्यं रामायणमाश्रित्य निर्मितम्।

६८. एकावलीनामकस्य अलङ्कारस्य प्रसिद्धमुदाहरणं हि - "न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्। न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्त जहार यन्मनः।।" इति।

॥ इति तृतीयः पाठः ॥

रघुवंशम्

भूमिका

भवन्तः सर्वे एव महाकवेः कालिदासस्य नाम श्रुतवन्तः। सः न केवलं भारतवर्षस्य अपि तु समग्रस्य विश्वस्य प्रसिद्धेषु कविषु अन्यतमः अस्ति। तेन सप्त काव्यरत्नानि लिखितानि इति अनेके स्वीकुर्वन्ति। रघुवंशं कुमारसम्भवम् इति द्वे महाकाव्ये, मेघदूतम् ऋतुसंहारम् इति द्वे खण्डकाव्ये, अभिज्ञानशाकुन्तलं विक्रमोर्वशीयं मालविकाग्निमित्रम् इति त्रीणि च नाटकानि। एतासु सर्वासु कृतिषु रघुवंशं प्रथमं स्थानम् आवहति। रघुवंशम् एकोनविंशतिसर्गात्मकम् एकं लालित्यपूर्णं महाकाव्यम् अस्ति। अत्र रघुवंशीयानां नृपाणां कथाः निबद्धाः सन्ति। भगवान् श्रीरामः एव महाकाव्यस्य नायकः वर्तते। दशमसर्गादारभ्य पञ्चदशसर्गपर्यन्तं तस्य एव कथा वर्णिता अस्ति। महाकाव्यं च राज्ञः अग्निवर्णस्य राज्याभिषेकेण समापयति कविः। रघुवंशे ये राजानः वर्णिताः सन्ति तैः सह रामायणे वर्णितानां नृपाणां महान् भेदः अस्ति। किन्तु वायुपुराणे वर्णितैः नृपैः सह तेषां भूयशः समानता दृश्यते।

वयं तावत् रघुवंशस्य प्रथमं सर्गं पठामः। तस्मिन् सर्गे कविः रघुवंशीयस्य महाराजदिलीपस्य चरित्रवर्णनं करोति। ततः च स सन्तानाभावात् भार्यया सुदक्षिणया सह वसिष्ठाश्रमं प्रति गच्छति। कामधेनोः अवज्ञा एव सन्तानलाभस्य प्रतिबन्धिका इति कुलगुरोः वसिष्ठात् जानाति। ततः तौ कामधेनसुतायाः सुरभेः सेवायां तत्परौ भवतः इति प्रथमसर्गस्य सारः। अस्मिन् ग्रन्थे च वयं सुदक्षिणादिलीपयोः वसिष्ठाश्रमगमनम् इति यावत् एव पठामः।